॥ श्रीकृष्णाष्टोत्तरशतनामस्तोत्रम् ॥

श्रीकृष्णः कमलानाथो वासुदेवः सनातनः ।
वसुदेवात्मजः पुण्योलीलामानुषविग्रहः ॥ १॥

श्रीवत्सकौस्तुभधरो यशोदावत्सलो हरिः ।
चतुर्भुजात्तचक्रासिगदाशङ्खाद्युदायुधः ॥ २॥

देवकीनन्दनः श्रीशो नन्दगोपप्रियात्मजः ।
यमुनावेगसम्हारी बलभद्रप्रियानुजः ॥ ३॥

पूतनाजीवितहरः शकटासुरभञ्जनः ।
नन्दव्रजजनानन्दीः सच्चिदानन्दविग्रहः ॥ ४॥

नवनीतविलिप्ताङ्गो नवनीतनटोऽनघः ।
नवनीतनवाहारो मुचुकुन्दप्रसादकृत् ॥ ५॥

षोडशस्त्रीसहस्रेशस्त्रिभङ्गी मधुराकृतिः ।
शुकवागमृताब्धीन्दुर्गोविन्दो योगिनां पतिः ॥ ६॥

वत्सपादहरोऽनन्तो धेनुकासुरभञ्जनः ।
तृणीकृततृणावर्तो यमळार्जुनभञ्जनः ॥ ७॥

उत्तालतालभेत्ता च तमालश्यामलाकृतिः ।
गोपगोपीश्वरो योगी कोटिसूर्यसमप्रभः ॥ ८॥

इळापतिः परञ्ज्योतिर्यादवेन्द्रो यदूद्वहः ।
वनमाली पीतवासाः पारिजातापहारकः ॥ ९॥

गोवर्धनाचलोद्धर्ता गोपालः सर्वपालकः ।
अजो निरञ्जनः कामजनकः कञ्जलोचनः ॥ १०॥

मधुहा मथुरानाथो द्वारकानायको बली ।
वृन्दावनान्तः सञ्चारी तुलसीदामभूषणः ॥ ११॥

स्यमन्तकमणेर्हर्ता नरनारायणात्मकः ।
कुब्जागन्धानुलिप्ताङ्गो मायी परमपूरुषः ॥ १२॥

मुष्टिकासुरचाणूरमल्लयुद्धविशारधः ।
सम्सारवैरी कम्सारिर्मुरारिर्नरकान्तकः ॥ १३॥

अनादिब्रह्मचारी च कृष्णाव्यसनकर्षकः ।
शिशुपालशिरश्छेत्ता दुर्योधनकुलान्तकः ॥ १४॥

विदुराक्रूरवरदो विश्वरूपप्रदर्शकः ।
सत्यवाक् सत्यसङ्कल्पः सत्यभामारतो जयी ॥ १५॥

सुभद्रापूर्वजो विष्णुर्भीष्ममुक्तिप्रदायकः ।
जगद्गुरुर्जगन्नाथो वेणुनादविशारदः ॥ १६॥

वृषभासुरविध्वम्सी बाणासुरकरान्तकः ।
युधिष्ठिरप्रतिष्ठाता बर्हिबर्हावतम्सकः ॥ १७॥

पार्थसारथिरव्यक्तो गीतामृतमहोदधिः ।
कालीयफणमाणिक्यरञ्जितश्रीपदाम्बुजः ॥ १८॥

दामोदरो यज्ञभोक्ता दानवेन्द्रविनाशनः ।
नारायणः परम्ब्रह्म पन्नगाशनवाहनः ॥ १९॥

जलक्रीडासमासक्तगोपीवस्त्रापहारकः ।
पुण्यश्लोकस्तीर्थपादो वेदवेद्यो दयानिधिः ॥ २०॥

सर्वतीर्थात्मकः सर्वग्रहरूपी परात्परः ।
एवं श्रीकृष्णदेवस्य नाम्नामष्टोत्तरं शतम् ॥ २१॥

कृष्णेन कृष्णभक्तानां गीतं गीतामृतं परम् ।

स्तोत्रं कृष्णप्रियतमं श्रुतं तस्मान्मया परम् ॥ २२॥

कृष्णनामामृतं नाम परमानन्दकारणम् ।
ईतिबाधादिदुः खघ्नं परमायुष्यवर्दनम् ॥ २३॥

दानं व्रतं तपस्तीर्थं यत्कृतं त्विह जन्मनि ।
जपतां श्रुण्वतामेतत् कोटिकोटिगुणं भवेत् ॥ २४॥

पुत्रप्रदमपुत्राणामगतीनां गतिप्रदम् ।
धनावहं दरिद्राणां जयेच्छूनां जयावहम् ॥ २५॥

शिशूनां गोकुलानां च पुष्टिदं पूर्णपुण्यदम् ।
बालरोगग्रहादीनां शमनं शान्तिमुक्तिदम् ॥ २६॥

समस्तकामदं सद्यः कोटिजन्माघनाशनम् ।
अन्ते कृष्णस्मरणदं भवतापत्रयापहम् ॥ २७॥

कृष्णाय यादवेन्द्राय ज्ञानमुद्राय योगिने ।
नाथाय रुग्मिणीशाय नमो वेदान्तवेदिने ॥ २८॥

इमं मन्त्रं जपन् देवी व्रजंस्तिष्ठन् दिवा निशि ।
सर्वग्रहानुग्रहभाक् सर्वप्रियतमो नरः ॥ २९॥

पुत्रपौत्रैः परिवृतः सर्वसिद्धिसमृद्धिमान् ।
निर्विश्य भोगानन्तेऽपि कृष्णसायुज्यमाप्नुयात् ॥ ३०॥

इति ब्रह्माण्डपुराणे ब्रह्मनारदसम्वादे श्रीकृष्णाष्टोत्तरशतनामस्तोत्रम् ।

॥ भारतीरमणमुख्यप्राणान्तर्गत श्री कृष्णार्पणमस्तु॥